श्री अंगारक स्तोत्रं

श्री अंगारक स्तोत्रं

अंगारकः शक्तिधरो लोहितांगो धरासुतः |
कुमारो मंगलो भौमो महाकायो धनप्रदः || 1 ||

ऋणहर्ता दृष्टिकर्ता रोगकृद्रोगनाशनः |
विद्युत्प्रभो व्रणकरः कामदो धनहृत् कुजः || 2 ||

सामगानप्रियो रक्तवस्त्रो रक्तायतेक्षणः |
लोहितो रक्तवर्णश्च सर्वकर्मावबोधकः || 3 ||

रक्तमाल्यधरो हेमकुंडली ग्रहनायकः |
नामान्येतानि भौमस्य यः पठेत्सततं नरः || 4 ||

ऋणं तस्य च दौर्भाग्यं दारिद्र्यं च विनश्यति |
धनं प्राप्नोति विपुलं स्त्रियं चैव मनोरमाम् || 5 ||

वंशोद्द्योतकरं पुत्रं लभते नात्र संशयः |
योऽर्चयेदह्नि भौमस्य मंगलं बहुपुष्पकैः || 6 ||

सर्वा नश्यति पीडा च तस्य ग्रहकृता ध्रुवम् || 7 ||

इति श्री अंगारक स्तोत्रं